| | | | |
|---|---|---|---|
| त्यक्तम्-क्तः-क्तवान्, | [1]त्याजितः, | तित्यक्षितः, | तात्यजितः-तवान्; |
| त्यजः, [2]त्यागी, [3]संत्याजी, | त्याजः, | तित्यक्षुः, | तात्यजः; |
| त्यक्तव्यम्, | त्याजयितव्यम्, | तित्यक्षितव्यम्, | तात्यजितव्यम्; |
| त्याजनीयम्, | त्याजनीयम्, | तित्यक्षणीयम्, | तात्यजनीयम्; |
| [4]त्याज्यम्, | त्याज्यम्, | तित्यक्ष्यम्, | तात्यज्यम्; |
| ईषत्त्यजः-दुस्त्यजः-सुत्यजः; | | — | — |
| त्यज्यमानः, | त्याज्यमानः, | तित्यक्ष्यमाणः, | तात्यज्यमानः; |
| त्यागः, | त्याजः, | तित्यक्षः, | तात्यजः; |
| त्यक्तुम्, | त्याजयितुम्, | तित्यक्षितुम्, | तात्यजितुम्; |
| त्यक्तिः, | त्याजना, | तित्यक्षा, | तात्यजा; |
| त्यजनम्, | त्याजनम्, | तित्यक्षणम्, | तात्यजनम्; |
| त्यक्त्वा, | त्याजयित्वा, | तित्यक्षित्वा, | तात्यजित्वा; |
| परित्यज्य, | प्रत्याजय्य, | प्रतित्यक्ष्य, | प्रतात्यज्य; |
| त्याजम् २ } त्यक्त्वा २ } | त्याजम् २ } त्याजयित्वा २ } | तित्यक्षम् २ } तित्यक्षित्वा २ } | तात्यजम् २; } तात्यजित्वा २. } |

(783) "**त्रकि गत्यर्थः**" (I-भ्वादिः-97. सक. सेट्. आत्म.)

**त्रखि** इति चन्द्र-सम्मताकारादीनां मतेन पाठः।

त्रङ्ककः-ङ्किका, त्रङ्ककः-ङ्किका, तित्रङ्किषकः-षिका, तात्रङ्ककः-ङ्किका; इत्यादीनि सर्वाणि रूपाणि भौवादिककङ्कतिवत् (140) बोध्यानि। कर्तरि क्तप्रत्यये [A]त्रङ्कितः इति भवति।

---

1. 'तारेर्ग्राहेस्तथा मोचेस्त्याजेर्दापेश्च संग्रहः।' (मा. धा. वृत्तिः 'नाथ' धातौ) इति वचनात्, '**त्याजितैः** फलमुत्खातैर्भग्नैश्च बहुधा नृपैः।' (रघुवंशे 4-33) इत्यादिप्रयोगाच्च ण्यन्तस्य द्विकर्मकत्वं ज्ञेयम्।

2. 'सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यज—' (3-2-142) इत्यादिना तच्छीलादिषु कर्तृषु घिनुण्प्रत्ययः। उपधावृद्धिः। 'चजोः कु घिण्ण्यतोः' (7-3-52) इति जकारस्य कुत्वेन गकारः।

3. ताच्छील्ये णिनिः। अस्य घित्त्वाभावात् कुत्वं न।

4. 'विप्रतिषेधे त्यजेरुपसंख्यानं कर्तव्यम्' (भाष्यम् 7-3-69) इति वचनात् 'चजोः—' (7-3-52) इति प्राप्तं कुत्वं न भवति।

A: 'प्रश्वङ्कनोत्त्रङ्कितत्द्रथस्वनादढौकि भीतैरपि नो शिखावलैः।' धा. का. 1. 14.